शास्त्री-I साहित्य

## अभिज्ञानशाकुन्तलम्

प्रश्न- अभिज्ञान शाकुन्तलमिति शब्दे व्युत्पत्तिं प्रदर्श्य एतत् नामकरणसार्थकतां प्रतिपादयत।

उत्तरम्- अभिज्ञानशाकुन्तलम् - अभिज्ञानं भावे ल्युट्। शकुन्तलायाः इदम् शाकुन्तलं "तस्येदम्" इत्यण्। अभिज्ञानञ्च तत् शाकुन्तलञ्च इति अभिज्ञानशाकुन्तलम् मयूरव्यंसकादित्वात् समासः अभेदोपचारेण अभिज्ञानशाकुन्तलम् नाटकमपि कथ्यते। अथवा अभिज्ञानकरणे ल्युट् शकुन्तलाम् अधिकृत्य कृतं नाटकं शाकुन्तलं "अधिकृत्य कृते ग्रन्थे" इत्यणि अभिज्ञान प्रधानं शाकुन्तलम् तत् नाटकम् यस्मिन् अङ्गुलीयकरूपम् अभिज्ञानम् प्रधानम् अस्ति।

नामकरण सार्थकता → नृपः दुष्यन्तः शकुन्तलया गान्धर्व विधिना विवाहम् अकरोत्। दिवसेषु गच्छत्सु राजा स्वराजधानीम् प्रत्यागतः। गमनावसरे च स्वनामाङ्कितम् राजकीयमङ्गुलीयकम् शकुन्तलायै दत्तवान्। विदित वृत्तान्तः कण्वः शकुन्तलाम् राजान्तिकम् शिष्यैः प्राहिणोत्।

किन्तु दुर्वाससः शापात् राजा ताम् न पर्यचिनोत्। शकुन्तला राज्ञा दत्तं स्मारकस्वरूपम् उत्कीर्णनामाक्षरम् अङ्गुलीयकं दर्शयित्वा व्यतीत वृत्तान्तम् स्मारयितुमैच्छत्। परन्तु अङ्गुलीयकं तदङ्गुलौ नासीत्। पूर्वमेव तत् शक्रावतारे शचीतीर्थे वन्दनावसरे अपतत्। भग्नमनोरथा सा शकुन्तला राजप्रसादात् निर्गता तत्क्षणमेव ज्योतिस्वरूपा काचिदप्सरा आविर्भूय ताम् शकुन्तलां गृहीत्वा तिरोऽभूत्। ततः तदङ्गुलीयकं विक्रीयमाणः कश्चित् धीवरः चौर इति कृत्वा राजपुरुषैः धृतः। श्यालः तदङ्गुलीयकमादाय राजान्तिकं गतः। तदङ्गुलीयकं दृष्ट्वा पर्युत्सुकः नृपो राजा शकुन्तलया सह निजगान्धर्व विवाहवृत्तान्तम् संस्मृत्य परं विलेदम्।

शम्भु उमाबल्लभ महावि० Rinku kumari
बुल्लोना, पूर्णिया। 13/06/21

उपशास्त्री
प्रथम खण्ड

साहित्य - तृतीय - पत्रम्
किरातार्जुनीयम - प्रथम - सर्ग

प्र० 1 — पद्यमिदम् व्याख्येयम् ।

स्त्रियाँ विधातय विधातुमिच्छतो,
रहस्यनुज्ञामधिगम्य भूभृतः ।
स सौष्ठवौदार्य विशेष शालिनीं,
विनिश्चितार्थामिति वाचमाददे ॥

उत्तरम् — प्रसङ्गः — प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितं किरातार्जुनीय महा काव्यस्य प्रथम् सर्गात् उद्धृतोऽस्ति । प्रस्तुत श्लोके सः वनेचरः स्वप्रियस्य [...] सम्माननीयस्य राज्ञः समक्षं अप्रियकठोरवचनस्य कथनं [...] युक्तम्, अतः तन्निवेदने स्वामिनः आज्ञया दोषो न भव[...] इति विचार्य आज्ञां प्राप्य वक्तुमारेभे —

व्याख्या — एकान्त स्थाने दुर्योधनादीनां शत्रूणां विनाशाय उद्योगं क[...] कामस्य महाराजयुधिष्ठिरस्य आज्ञां लब्ध्वा सः किरात[...] शब्दस्य एवमर्थस्य सौन्दर्यस्य विशेषताभिः विभूषित[...] तथा युक्तिभिः प्रमाणैश्च सुनिश्चितार्थवतीं 'वाणी' वक्तुम[...]

विशेष — विधातय विनिश्चितार्थाम् वाचम् "आदिषु व - वर्णस्[...] आवृत्या अत्र वृत्यनुप्रासालंकारः वर्तते ।

(ख) — कविः स्वयमेव स्वकाव्यस्य वैशिष्ट्यं स्पष्टीकृतवान् "सौष्ठवौदार्य विशेषशालिनीम्" ।

Renu Devi,
13/06/21

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

उपशास्त्री
द्वितीय खण्ड

साहित्य – तृतीय-पत्रम्
किरातार्जुनीयम् – प्रथम-सर्गः

Date ___/___/___

प्र० (1) – पद्यमिदम् व्याख्येयम् ।

महौजसो मानधना धनार्चिताः
धनुर्भृतः संयति लब्धकीर्तयः ।
न संहतास्तस्य न भिन्नवृत्तयः
प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ।

उत्तरम् – प्रसङ्गः → प्रस्तुतोऽयं श्लोकः महाकवि भारविविरचित किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतो अस्मिन् श्लोके दुर्योधनस्य योद्धाः स्वप्राणैरप्यधिकं तस्य हितं कर्तुमिच्छन्ति, अस्यैव वर्णनं कुर्वन् वनेचरः कथयति ।

व्याख्या – राज्ञा दुर्योधनेन प्रत्येकम् अवसरे धनादिभिः सम्मानिताः मनस्विनः, यैः रणक्षेत्रे स्ववीरत्वस्य यथोचितं प्रदर्शनं कृत्वा ख्यातिः अर्जिता तथा ये नितरां स्वाभिमानिनः वीराः सैनिकाः सन्ति, ते स्वप्राणानपि अचिन्तयन्तः कृतज्ञस्य दुर्योधनस्य प्रकारेण हितं सम्पादयितुं तत्पराः भवन्ति ।

विशेष: (क) महौजस – आदिविशेषणैः हेतुकथनत्वात् काव्यलिङ्गालंकारः
(ख) साभिप्रायविशेषणात् परिकर-अलंकारः ।
उभयोरलंकारयोः तिलतण्डुलवत्, स्पष्टत्वात् संसृष्टि नामाऽलंकारोऽपि स्वदीप्तिं प्रसारयति ।

Renu Devi
13/06/21
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया

classmate



साहित्यम्
रघुवंश त्रयोदशः सर्गः

Saathi

Date __/__/__

प्र० (1) पद्यमिदम् व्याख्येयम् ।

वैदेहि पश्याऽऽमलयाद्विभक्तं मत्सेतुना फेनिलमम्बुराशिम् ।
छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारम् ॥

उत्तरम्-प्रसङ्गः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतः रघुवंश-महाकाव्यस्य त्रयोदशः सर्गात् समुद्धृतोऽस्ति ।

— प्रस्तुत श्लोके भगवतः श्रीरामः स्वां प्रियां सीतां प्रति उक्तवान — अयि जनकनन्दिनी! मलयपर्वतपर्यन्तं लम्बायमानेन सेतुना द्विधाकृतं फेनिलं महोदधिं शरदतौ आकाशगङ्गया द्विधा विभक्तं निर्मलाभिस्ताराभिः व्याप्तं विस्तृतं व्योम इव निरीक्षस्वेति भावः ।

व्याख्या — हे वैदेहि! = विदेहतनये सीते! आमलयात् = मलयपर्वतपर्यन्तम् । मत्सेतुना = मदवया । विभक्तम् = द्विधाकृतम् । फेनिलम् = फेनवन्तम् । अम्बुराशिम् = समुद्रम् । छायापथेन = आकाश-स्थानभेदेन । विभक्तम् । शरत्प्रसन्नम् = शरदृतुनिर्मलम् । आविष्कृतचारुतारम् = प्रादुर्भूतसुन्दरनक्षत्रम् । आकाशमिव = अम्बरमिव । पश्य = विलोकय ।

Renu Devi
13/06/21

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।